नं० ४६३६

नाम - उड्डारकोशः

कर्त्ता - दक्षिणामूर्त्ति मुनिः

पत्रसंख्या - २५ पत्राणि सं० X

विषयः - तंत्रम्

उद्धारकोषः

𑇔𑇙𑇓𑇙

4939

F = 23

ॐ श्रीगणेशाय नमः एकदा स्फाटिकोर्वीभृन्नानौवनसमाकुले संस्थितौ पार्वतीशंभू लो
करक्षणतत्परौ १ पार्वती परमेशानं प्रोवाच वचनं हितं श्रीपार्वत्युवाच देवदेव सुरश्रे।
ष्ठ दयार्त्तैगुणपमानस देवी भगवती देव महात्रिपुरसुंदरी २ अस्मिंस्त्वराचरे लोके ऽङ्करकेन
उ॰को॰ प्रकाशिता श्रीईश्वर उवाच शृणु देवि प्रवक्ष्यामि गोप्यं तव कुतूहलात् रेवातटे महापुण्ये
१ श्रीगर्भा नाम सत्पुरी अस्ति त्रैलोक्यविख्याता सर्वमङ्गलशोभिता तस्यां बभूव विप्रेन्द्रो देव
गंधर्वसेवितम् पुण्यं तपोवनपदं नानावृक्षसमाकुलं तस्मिंस्तपोवने पुण्ये सेवितोपि मुनीश्व
रैः ऋषिः स्याद्दृक्तिमान्मूर्तिमत्तदाराधनतत्परः नानाशास्त्राविद्द्वेतोपि सर्वागमनिधिस्त्व
भूत् एकदा स्नातुमायातो रेवां पुण्यजलाविलाम् शाक्रपुण्यकर्मणा तस्मै तुष्टा त्रिपुरसुंद
री जलमध्ये स्थिता गोप्त्री महात्रिपुरसुंदरी स्वमन्त्रं सिद्धिदं तद्देव्याः [illegible] ।
सर्वं फलवं गोप्यं स मुनीन्द्रशिरोमणिः तदाप्रभृति तन्मन्त्रं ध्यायन्स्तोत्रं जपन्हृदि तत्प्र
भावान्महादेवि ग्रंथं कर्तुमियेष सः तदनुग्रहमात्रेण स मुनीश्वरपूजितः ग्रंथमुद्धारको।
शाख्यं वाकरोन्मंत्रसागरं अन्यान्नानाविधान्ग्रंथान्ग्रेन्स्त्रैलोक्यपूजिते तदाप्रभृति दे

वेशिवसिद्धेश्रमिमण्डले ग्रन्थमुद्धारकोशाख्यं सर्वागमविनिश्चितम् श्रीदेव्युवाच देवदेव।
जगन्नाथभक्तानुग्रहकारक श्रोतुमुद्धारकोशाख्यं नानागमविनिश्चितम् इच्छामि परमप्री
त्या वक्तुमर्हसि धूर्जटे ईश्वर उवाच शृणु पार्वति वक्ष्यामि ह्युद्धारं त्रिपुरादिनम् देवीनां दे
वविद्यानां मन्त्रोद्धारमनुत्तमम् ग्रन्थमुद्धारकोशाख्यं सर्वागमविनिश्चितम् सर्वग्रन्थादि
रहस्यं च न त्वं कुरु ब्रवीम्यहं तदनुग्रहमात्रेण सर्वानुद्धारसंचयान् अब्रवीद्दक्षिणामूर्तिः
क्रौञ्चमक्षोभ्यनामकम् शृणु क्रौञ्च महाभाग देवीभक्तिसमन्वित रहस्यं सर्वलोकानां देवा
नामपि दुर्लभम् देवि तस्मिन्नवसरे शिष्याय प्रियवादिने मुनीन्द्राद्दक्षिणामूर्तिरब्रवीद्गुह्य
मुत्तमम् भाषितेयं त्वनुग्रहेन तत्प्रसादान्महेश्वरि देवीनां देवतानां च न त्वं कुरु ब्रवीम्यहम्
अथादौ त्रिपुरामन्त्रोद्धारः लक्ष्मीपरमदनवाग्भवशक्तिकाचमारंवमूर्तिकमलाकथिताच
विद्या शक्त्यादिकं तु विपरीतलयाच प्रोक्तः श्रीषोडशाक्षरविधिः शुभदस्तु ईरणः इति वा।
मकेश्वरे उड्डामरे च वीरोदये अवाभूतिः कामवाग्भवमेव च शक्तिः प्रणवलज्जे निलक्ष्मीः
शक्त्यादिकं ततः विपरीतलयाप्रोक्ता विद्या श्रीषोडशाक्षरी रुद्रयामले हरिणाहीनयामा

याकामराजस्ववासना मारस्तत्वं तथा त्वामा लक्ष्मीशब्दादिकं तथा विपरीततथाशे
क्ताविद्याश्रीषोडशाक्षरी तथाप्यस्मिन्नुद्धारकोशे उक्तं चक्रिश्वरहस्ये लक्ष्मीः पद्मा
हरिप्राणेशीसरोरुहनिवासिनी कमलारुक्मिणीचैवनारायणप्रियापिच लक्ष्मीवीजा
उ॰को॰ निसप्तैवं कृत्रिमाण्यपराणिच अपरंचत्रिपुरातिलके उमे हे कमलापद्माहरिकांता
२ तथैवच श्रियोवीजानिनामान्येवानन्तान्यपराणिच इति लक्ष्मीवीजानि अथह्रींवी
जानि ह्रुक्तं वागमालंकारे पराभूतिस्तयालज्जामायापि सकलाकृशा समस्तापित।
2 थादेवी कृत्रिमाण्यपराणिच ततो मदनवीजानि उक्तं च भैरवतंत्रे कामः पञ्चेषुरेवं
च मदनो मन्मथस्तथा मारः प्रद्युम्नः कंदर्प अनन्तान्यपराणिच ततो वाग्भववीजानि
उक्तं च त्रिपुरासारसर्वस्वे वाग्भवं वाङ्बीजं च चारणं चाण्डिकेश्वरः चक्षुपि चर्मवसनं
वासनापि तथैवच चार्वङ्ग्यपि च चर्माणाम समान्यपराणिच ततः शक्तिवीजानि।
उक्तं च क्लिं आशिरोमणौ शक्तिः शमीपि विज्ञेया शर्करं केतथैवच शक्तिवीजानि च २
त्वारिकृत्रिमाण्यपराणिच ततओंकारवीजानिप्रणवं च धनुर्लांस्यहंतो मोपिच

बुकः ज्ञासस्तारकपलानिनामानिसलवस्याच अपराणिहृसुन्यानिसयाप्रोक्तानिपार्व
ति विपरीतनयाप्रोक्ताविद्याश्रीषोडशाक्षरी प्रकाशं श्रींह्रींक्लींऐंसौः ॐह्रींश्रींक्लींह्रीं
सौः ऐंक्लींह्रींश्रीं । अथदशविद्या त्रिपुराश्रीश्चवाग्देवीताराभुवनेश्वरी मातंगी
कालिकाशारिकाराज्ञीभीमज्वालामुखीतथा दशविद्याः स्वयंचैतामाषिताकुलिवासया ।
वामकेश्वरेषोडशाक्षरीविद्या एतादशैवषडन्यायोजिताषोडशाक्षरी दशविद्याभद्रकालीत्वरी
वह्निमालिका दक्षिणकालिकाश्यामाकालरात्रिपिसुंदरी एतासांमूलमंत्रेणयोजितैकाक्ष
रेणच ब्रह्मादिदैवतैः पूज्याविद्याश्रीषोडशाक्षरी ततोलक्ष्मीमंत्रोद्धारः ॐकंचरुद्रयामले ह
रिणाक्षीपराश्रवलेलक्ष्मीबीजत्रयमिदं विपरीतनयाप्रोक्तंसर्वफलदायकं ह्रांमार्शका
पिनीरंतदंतेप्रोक्तंशिष्यानमं ॐकंचाङ्गमरे ततः स्वाहाबीजानि आपोवनंतथानीरंठद्व। लक्ष्मि
पंचपयसत्था जलबीजानिप्रोक्तानिषडस्मान्यन्यानिच प्रकाशं ॐह्रींश्रींमहालक्ष्मिस
र्वकामप्रदेसर्वसौभाग्यदायिनिअभिमतंप्रयच्छसर्वेसर्वगतेसुरूपेसर्वदुःखविमोचिनि
ह्रींसौः स्वाहा इतिमंत्रः ततः सरस्वतीमंत्रोद्धारः ॐकंचशारदापटलेतारंलज्जावाग्भवंच

पराप्रणवमेवच बीजंपंचशिरोन्तेयमंन्तेस्येयंनमश्शनि प्रकाशं ॐह्रींऐंह्रींओंवाग्देव्यैनमः
ततोनमोबीजानि ॐकंचागमालंकारे नमोविघ्नंतथालंभसौःमकमश्मरीतथा श्रंमा
निकृत्रिमान्येवंसूत्रसूत्रनमस्कृते ततस्तारमंत्रनिर्णयः ॐकंचभैरवसर्वस्वे तारंत्रोथंत
उ॰कौ॰ थाकोतमामायावाग्भवमेवच कूर्चंचैवमहेशानिहृल्लेफट्हूंयंतथा ततोह्रांबीजोद्धाराणि
३ ॐकंचागमसिद्धौ स्कंदेव्योधंचत्रिभचसंयोज्यहरमितलः ह्रांबीजोद्धारमेतज्जिवान्यदन्नमा
वदेत् ततः स्त्रीबीजोद्धाराणिवामकेश्वरे कोलाचकमलाह्रींचप्रियापिपरमापिच लंभा
लै पिलंलैतोसूत्राज्ञासूत्रसत्यान्यपराणिच ततः कूर्चबीजोद्धाराणि ॐकंचक्लिश्रारहस्ये कूर्चं
कूलंनटंतीरमसत्यान्यपराणिच अस्मिन्नेवफट्बीजोद्धाराणि फट्हरंतुसंचान्यदसत्येचसुरेश्व
रि प्रकाशः ॐह्रांह्रींहूंपैंहूंउग्रतारेफट्स्वाहा ततोभुवनेश्वरीमंत्रोद्धाराणि ॐकंचकु
ब्जिकासर्वस्वे प्रणवंचतथामायाकमलामन्मथस्तथा श्रंतेविघ्नंमहेशानिनाममध्येसु
रेश्वरि प्रोक्तोयंभुवनेश्वर्यामनुसर्वार्थसाधकः अथमंत्रबीजोद्धाराणि ॐकंस्वतंत्रेत्रिपुरादी २
कायां मंत्रोमनुः हरंश्रेवेहरत्रीं लेविदुर्बुधाः बीजान्येतानिमंत्रस्यकृत्रिमान्यपराणिच हर

बीजैर्हीमंत्रः फट्च प्रकाशः ॐह्रींश्रींक्लींभुवनेश्वर्यैनमः इतिमूलम् ततोमातं
गीबीजोद्धाराणि ॐकंचकुलसिद्धमनाने नोमः कालीनयालक्ष्मीवागुराद्यमेवच।
वारुकंस्म बीजानिह्याद्यौप्रोक्तानिशंभुना ग्रंमेजेह्रानयापग्रंलजानीरजमेवच वासनापं
कजंचैववनेप्रोक्तंब्रह्मशूलिना इतिमातंगीमंत्रोद्धाराणि अथकालीबीजोद्धाराणि ॐलं
वकुलचूडामणौ कालीक्रंलीरक्ष्मायिजिह्वापिरसनानया श्रींबीजानिचह्येतानिकृत्रि
मान्यपराणिच अथवागुराबीजोद्धाराणि वागुरावागुरुह्याविवानदासीत्रिबीजकं प्रींबीजा
नितयाप्रोक्तमनन्यपराणितु अथवारुकबीजोद्धाराणि मुण्डमालातंत्रे वारुकंचैवचा
ह्रंगीवाहनोक्तंतबीजकं चन्द्रंपंचक्लींबीजमसन्यान्यपराणिच पाँवंगीबीजोद्यौक्लींपं ततः
पद्मबीजोद्धाराणि ॐकंचवामकेश्वरे पद्मंपंकजपयोजनीरजमंबुजंतथा पंचठकारबीजान्यनन्या
न्यपराणिच प्रकाशः ॐक्लींश्रींप्रींप्रींक्लूंउच्छिष्टचंडालिनिदेविमहापिशाचिनिमातंगि
देविक्लींठः ह्रींठः पैंठः स्वाहा इतिमातंगीमूलं अथशारिकामंत्रोद्धारः ॐकंचतुह्यतौत्रि
पुराशिरोमणौ नारेमायाश्रियंक्लींचैसिंधुरंस्थलमेवच कल्याणिंशारिकादेव्याबीजंसमाव

रं स्मृतं अग्रे तेलं भं च विज्ञेयं शारिकामूलमुत्तमम् ततः सिंधुरबीजोद्धाराणि उं अं बाम
केश्वरतंत्रे सिंधुरं च गजं चोणहस्तं च हरिदंतं तथा फ्रों बीजानि च चत्वारि कृत्रिमाण्य
णानि च ततः आकाशबीजानि अं भैरवतंत्रे शून्यं खं अंबरं व्योम आं बीजं च चतुष्
उ.को. यं हकारं चैव विज्ञेयं मुखं च हृद्यामले अमृतमपरं ज्ञेयं तारा भक्तिसमन्वितं ततः
७ कल्याणबीजानि अस्मिन्नेव कल्याणं चैव शर्माणि शुभं च चतुष्टयं अनंतमपरं ज्ञेयं पर्व
तेश्वरतंत्रे दिनिशार्म बीजो ह्रौं सौः शं च प्रकाशः ॐ ह्रीं श्रीं ह्रूं फ्रों आं शं शारिका भगवत्यै
नमः इति मूलं ततो राज्ञीमंत्रोद्धाराणि तारं लज्जां श्रियं मन्त्रिः कामं शक्तिः षडक्ष
रः बीजं च षट् शिरो ज्ञेयं ततः पल्लवमुद्धरेत् भगवत्यै तथा राज्ञ्यै ह्यन्ते माया च द्वयम्
एभिः सहमनुः प्रोक्तो राज्ञ्याः पंचदशाक्षरः ततोऽग्निबीजोद्धाराणि अग्नी रेफश्च वह्नि
श्चज्वलनभुक् हव्यवाहनः रं बीजोद्धारमेतद्धि सत्यमपरं स्मृतं प्रकाशः ॐ ह्रीं श्रीं रं क्लीं ७
सौः भगवत्यै राज्ञ्यै ह्रीं स्वाहा इति राज्ञीमूलं अथ कुलचूडामणौ श्यामातंत्रे च ब्रीडा मे
च निर्णयः प्रणवं विभूति श्च हरिकांता तथैव च विपक्षमप्यग्निबीजानि संयोज्य वाग्भ
चे

वंतथा मदनेचतथाशंकाबीजंसमाहरंवदेत् द्वयेनसमायुक्तः प्रोक्तोविंशाक्षरोमनुः
प्रकाशः ॐ ह्रीं श्रीं ह्स्रौं ऐं क्लीं सौः श्रीउग्रभगवतिहेसरूपिणिस्वाहा इतिमूलं अथज्वा
लामुखीमंत्रनिर्णयः शारदाटीकायां नारंलज्जाश्रियंचैवज्वालामुखिममेतिच सर्वश
त्रून्भक्षयद्विरंतेकूर्चंहंरंद्वयः बीजंचअक्षरंदेव्याज्वालामुख्याः सुरेश्वरि प्रकाशः ॐ।
ह्रीं श्रीं ज्वालामुखिममसर्वशत्रून्भक्षयभक्षयहुंफट्स्वाहा इतिमूलम् दशविद्यामया।
प्रोक्तायथागमविनिश्चिताः साधकेष्टप्रदादेव्यानानारत्नविभूषिताः फलासांदशविद्या
नांगुणान्वक्ष्यामितच्छृणु दक्षिणामूर्तिरुवाच मुक्तिंददातित्रिपुरालक्ष्मीलक्ष्मींददा
तिच विद्यांददातिवाग्देवीप्रत्यक्षंजन्मनिश्चलं तारास्थानंचमोक्षंचददातिभुवने।
श्वरी मातंगीरक्षतीशत्रुभीतिंहरतिनित्यशः शारिकाशंददात्येवराज्ञीराज्यंप्रयच्छ
ति भीमादेवीददात्येवंसंततिंविश्वव्यापिनीम् धनंज्वालामुखीदेवीभक्तेभ्यः संप्रय।
च्छति दशविद्यायथाचैताभक्तेभ्यःफलमिष्टदम् प्रयच्छतिमहादेविपूजाहोमजपा
दिभिः इतिश्रीदक्षिणामूर्तिविरचितेउद्धारकोशेसर्वागमाणिवेदशविद्यामंत्रोद्धारको

शोरवानंनामप्रथमः कल्पः १ ननु त्रिपुराषट्सखीनां मंत्रोद्धाराणि ईश्वर उवाच शृ
णु देवि प्रवक्ष्यामि त्रिपुरापरिवारिणां षट्सखीभिरहं तासां मंत्रोद्धारान्ब्रवीमि ते श्रीदेव्य
उवाच गुरो विधानसंभूत नानाशास्त्रविचक्षण श्रोतुमिच्छाम्यहं सर्वान्मंत्रांश्च मुक्तिहेत
३. कौ. वे दक्षिणामूर्तिरुवाच शृणु देवि महायोगिन् सर्वं वक्ष्यामि तत्वतः दशविद्या भद्रका
५ लीतुरी च छिन्नमस्तका दक्षिणाकालिका श्यामा कालरात्रीति संदरी षट्सखीनामहं ता
सां मंत्रोद्धारान्ब्रवीमि ते तत्रादौ भद्रकालीमंत्रोद्धाराणि कालीत्रयं कूर्चयुग्मं लज्जायुग्मं
च भद्रिका भद्रकालिपदं ब्रूयाद्बीजानि प्रतिलोमतः ठद्वयेन समायुक्तो भद्रकालीमहाम
नुः इति श्यामातंत्रे अथ भद्रकालीबीजोद्धाराणि उक्तं च मुण्डमालातंत्रे भद्रकाभास्व।
ती भीमा भैं बीजत्रितयस्मृतं अनन्तमपरं तेषां ब्रह्मावयसमुद्भव प्रकाशः क्रीं क्रीं क्रीं हूं।
हूं ह्रीं ह्रीं भैं भद्रकालि भैं ह्रीं ह्रीं हूं हूं क्रीं क्रीं क्रीं स्वाहा इति भद्रकालीमन्त्रं अथ तुरीमंत्रोद्धा
रः उक्तं च स्वतंत्रे प्रणवं तारकाज्योतिः सा वाऽहं ते नमः इति तुर्यामन्त्रमिदं प्रोक्तं स्वतंत्रेशं।
भना स्मृतं अथ तारकाज्योतिः तारामंत्रोद्धाराणि उक्तं च कामेश्वरतंत्रे अहं मे तारकाज्यो

तिलाराबीजानिपंचक प्रकाशः ॐ त्रुं त्रौं त्रों महानर्थैनमः इति नुरीमंत्रोद्धारः अथ छिन्नमस्त
कामंत्रोद्धाराणि ॐ चछिन्नाशिरामतो अंबकामकलायद्मावाहकंचसुरेश्वरि अंतेऊकू
नवीजंचफट्द्वयसमायुतम् इतिमंत्रोद्धारः प्रकाशः ॐ ह्रीं श्रीं क्लीं छिन्नमस्तके क्लीं फट्
स्वाहा अथहिमेदालके ॐ चागमलहर्यो लक्ष्मीलज्जातथामायामात्री द्वादशकामय ब
ज्रवैरोचनीयेहेमायेहे फट्स्वाहयायुते इत्युद्धारः प्रकाशः श्रीं ह्रीं ह्रीं ऐं वज्रवैरोचनीये ह्रीं ह्रीं फ
ट्स्वाहा अथदक्षिणकालीमंत्रोद्धारः ॐ चश्यामारहस्ये ॐ क्लीत्रयंतोयुग्मंद्वामायुग्मंततो
भिधं दक्षिणेकालिकेचैवमंतेकालीत्रयंपुनः कूर्चयुग्मंपरायुग्मंपयश्चैवसुरेश्वरि दक्षि
णकालिकायास्तुमनुर्द्वाविंशदक्षरः प्रकाशः क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं दक्षिणेकालिके क्रीं
क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा अथश्यामामंत्रोद्धारः ॐ चश्यामातंत्रे हरिणबीजतथालज्जाका
लीजिह्वाचतुष्टयम् ततः सुधारसेश्यामेकुलशापंविमोचय अमृतंश्रावयस्वाहाश्यामा
मंत्रमुदाहृतं प्रकाशः श्रीं ह्रीं क्रीं क्लूं श्रैं क्रौं क्रः सुधारसेश्यामेकुलशापंमोचय अमृतंस्रा
वयस्वाहा इतिश्यामामूलम् अथकालरात्रीमंत्रोद्धारः ॐ चकालरात्रीकल्पे प्रणवं

वासनामायामन्मथः कमलोद्भवमिनिदोषः बीजंपंचशिरोज्ञेयंनतः पल्लवमुद्धरेत् इतिक्लि
न्नरहस्ये ततोमध्यमिथोगत्वाहृल्लेसर्ववशंकुरु कुरुनीरंदेहियुग्मंमध्येत्वकामिथोचकामिनि
गणेश्वर्यैनमोन्तेचविमृष्टंचसमुद्धरेत् प्रकाशः ॐ ऐं ह्रीं क्लीं श्रीं कामेश्वरिसर्वजनमनोहारि
उ॰को॰ ६ णिसर्वमुखस्तंभिनिसर्वराजवशंकरिसर्वदुष्टनिर्दलिनिसर्वस्त्रीपुरुषाकर्षिणिवंधीशृंख
लान्त्रोटय २ सर्वशत्रून्भंजय २ द्वेषान्निर्दलय २ सर्वान्स्तंभय २ मोहनास्त्रेणद्वेषिणा
मुच्चाटय २ सर्ववशंकुरु २ स्वाहादेहि २ सर्वकालरात्रिकामिनिगणेश्वर्यैनमः ३
त्रिकालरात्रीमूलं अथभेदानि देवेशित्रिपुराबालाविज्ञेयंद्वादशात्मकं उक्तंचमुण्डमा
लातंत्रे द्वादशात्मकंविज्ञेयंत्रिपुरामंत्रमुत्तमं केवलंमुक्तयेदेविपंचोक्तंनकुंभस्मृतं
अघोरागमे अष्टात्मिकाचविज्ञेयाविद्याश्रीषोडशाक्षरी परंयन्त्रंचिंतितंदेविसद्योमुक्ति
प्रदंस्मृतं तथाचसद्रुक्तौत्रिपुराशिरोमणौ अष्टात्मिकमिदंबीजंत्रिपुरायाः स्मृतंतथा
अष्टभिर्वत्सरैर्वापिमासैरष्टभिरेवच अष्टभिर्दिवसैर्वापिजानीयान्मुक्तिलक्षणं लक्ष्मी ६
मेदहृदयंज्ञेयंभाषितंकमलवासया लक्ष्मीश्चरुक्मिणीचैवत्रिभिर्वर्षैः फलंभवेत् अथ

सरस्वतीभेदानि उं च कामिनीकल्पे वाग्देवीचतथावालीसरस्वत्यनलप्रिया भेदान्ये।
तानिख्यातानिफलंवर्षचतुष्टये ततस्ताराभेदानि उं च वामकेश्वरे तारापिनाकिणीचै
वमेकजटातथैवच नीलसरस्वतीचैवमुग्रताराप्रकीर्तिता ताराभेदानिपंचैवमहोभ्येनप्र
काशितं अथभुवनेश्वरीभेदानि उं च भैरवीतंत्रे भैरवीभीमरूपाचभीमाचभुवनेश्वरी।
भक्ताफलप्रदादेवीनित्यंवर्षचतुष्टये अथमातंगीभेदानि उं च रुद्रयामले मातंगीसु
मुख्योरैकांमतंगमुनिनास्मृतं मातंगीचक्रिणीदेवीउच्छिकाशांभरीतथा देव्याभेदानि
चत्वारिफलंवर्षचतुष्टये अथशारिकाभेदद्वयं शारिकापितथापर्णाफलदापिद्विवर्षिके
ततोराज्ञीभेदानि राज्ञीभेदद्वयंप्रोक्तंराज्ञीचवेगगामिनी द्विवर्षमध्येभक्ताचराज्ञीराज्यं
प्रयच्छति भीडाभेदविहीनाचप्रज्ञाभाग्यविवर्द्धिनी इतिकालिकार्णवे अथज्वालामुखी
भेदानि उं च ज्वालागिरिमणौ ततोज्वालामुखीचैवम्बिकाभगरूपिणी यथेष्टफल
देप्रोक्तंज्वालाभेदत्रयमिदं एतासांदशविद्यानांनानाभेदमुदाहृतं तत्रादौत्रिपुरातिलके
त्रिपुराभेदानि उं च मुण्डमालातंत्रे त्रिपुरातिलकेच त्रिपुराभैरवीविद्याहिंगुलाचंडि

कानया चामुण्डानारसिंहीच ह्सैं ह्रीं हैमवतीश्वरी मृडानीवारुणीदुर्गामहात्रिपुरसुंदरी दे
व्याह्लादयाभेदानिप्रेम्णान्येनानिमूलिना प्रकाश: श्रीं ह्रीं सौ: त्रिपुरेपिचेंदुवसनेकाम:
शरद्भैरवि ॐ ह्रीं श्रीं ह्रीं मूलेनथैवकमलाह्वामाच्यहंचंडिके चामुण्डे ह्सकलह्रींचसकल
उ० को० ह्रीं श्रीं नारसिंहीनया ह्सौं ह्रीं चारणमेवह्रींचमदन:कामंपरारुक्मिणीदेविहैमवलक्ष्म्यपि
कमलालज्जानयामन्मथ: चंडीवारुणिवाकपर्दलपराडुर्गेस्मरांशंभुना श्रीं ह्रीं क्लींवा
रुणीपारदपिनयाव्यहंपरारुक्मिणी विद्याश्रीविपरीतभावसहिता सन्षोडशाणाविधि:
इतिश्रीषोडशाक्षरभेदा: श्रीदेव्युवाच महेश्वरत्रिकालज्ञशरणागतवत्सल भेदैर्युतानां
देवीनांमन्त्रंत्वंवक्तुमर्हसि ईश्वरउवाच दययानवदेवेशानंवक्ष्यामिसमासत: यदुक्तं
भैरवीतंत्रे अथश्रिय:मंत्रोद्धार: ॐ ह्रीं श्रीं हरिणाक्षीबीजहृदयंफलप्रदंस्मृत: ज्यह्रींश
क्तिनीमंत्रेप्रोक्तमपिपूर्वेदिना अथरुक्मिणीमंत्रोद्धार: ॐ ह्रीं चैवंरुक्मिण्यारंलक्ष्मी
पयस्तथा अंतेप्रोक्तंमहेशानिलक्ष्म्याभेदहृदयमिदं प्रकाश: ॐ ह्रीं श्रीं लक्ष्मिॐ ह्रीं म: स्वाहा ॐ
ह्रीं रुक्मिणिॐ श्रीं स्वाहा अथसरस्वतीभेदा: नोमापरावाग्भवमेवह्वामानारंचप्रोक्तंपरमेश्वरे

ण वाग्देवतायाः फलदं हि वालेन्दुं नमो भक्तिपरायणानां प्रकाशः ओं ह्रीं ऐं वाग्देवतायै नमः
अथ वाणी मन्त्रवर्णीमंत्रोद्धारः तारं लज्जा ऐं बीजं च ह्रीं नेत्रं भगुराहुतं प्रकाशः ओं ह्रीं ऐं वा
णी मन्त्रवर्ण्यै नमः इति मूलम् अथ सरस्वतीमंत्रोद्धारः वाग्भवं पिविमं नित्यं ग्रहं सरस्वत्यै
नमः नमोन्ते परमेशानि मयापि प्रोक्तं न गान्मजे प्रकाशः ओं ऐं ह्रीं सरस्वत्यै नमः अथानल
प्रियामूले ताराल्लज्जावाग्भवं च मध्ये अनलप्रियेन्ततः अहं विश्वं तत्पानेच पदं नेश्वरि नेदिनि
देव्याश्चत्वारि मेदानि सरस्वत्यावरानने ओं ह्रीं ऐं अनलप्रिये ओं नमः अथ ताराभेदानि प्रका
शः ओं ऐं हूं तारे फट् स्वाहा ओं ह्रीं ऐं तारिणि फट् स्वाहा ओं ह्रीं ऐं हूं एकजटे फट् स्वाहा ओं ह्रीं
ऐं हूं नीलसरस्वति फट् स्वाहा ओं ह्रां ह्रीं ह्रूं ऐं हूं उग्रतारे फट् स्वाहा इति ताराभेदाः अथ भु
वनेश्वर्याः ओं नमो भैरव्यै मूलम् ओं ह्रीं भीमरूपायै नमो मूलम् ओं ह्रीं भीमायै नमः इति मू
लम् ओं ह्रीं श्रीं क्लीं भुवनेश्वर्यै नमः इति मूलं ओं क्लीं श्रीं ह्लीं भुवनेश्वर्यै नमः इति मूलं अ
थ मातंगीभेदाः प्रकाशः ओं क्लीं श्रीं मीं प्रीं क्लीं उच्छिष्टचाण्डालिनि देवि महापिशाचिनि मातं
गि देवि क्लीं ठः ह्रीं ठः ऐं ठः स्वाहा अथ चक्रिण्याः ओं क्लीं क्रों महाचक्रिणि ऐं ठः ठः स्वाहाः ततः के

त्रिकायाः ॐ श्रीं श्रीं कुब्जिके देवि ह्रीं ठः स्वाहा अथ शांभवीः ॐ श्रीं देवि शांभवि क्रीं ठः स्वा
हा अथ शारिकाभेदहृदयं नलोपर्णामूलं ॐ ह्रूं श्रीं श्रां शां देव्यै अपर्णायै नमः अथ हैमव
तीश्वरीमूलं ॐ ह्रीं श्रीं हैमवतीश्वरी ह्रीं स्वाहा भीडाभेदविहीनेनालम् ॐ अथांबिका।
उ॰को २ मूलं ॐ ह्रीं मातंगिके ह्रूं फट् स्वाहा ॐ श्रीं देवि भगरूपिणि ह्रूं फट् स्वाहा इति भगरूपि।
ण्याः एतानि भेदमंत्राणि मयोक्तानि पार्वति एतासां दशविद्यानामन्यासां शृणु वच्म्य
हं भद्रकाली यथा देवी दक्षिणकालिका तथा प्रकाशः क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं भैं भद्रका
लि भैं ह्रीं ह्रीं हूं हूं क्रीं क्रीं क्रीं स्वाहा क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं दक्षिणकालिके क्रीं क्रीं क्रीं हूं हूं।
ह्रीं ह्रीं स्वाहा नृतीभेदविहीना लिप्यधेष्टफलदायिनी अथ छिन्नमस्तका द्विविधा प्रका
शः ॐ ह्रीं श्रीं क्लीं छिन्नमस्तके क्लीं स्वाहा द्वितीयः श्रीं ह्रीं ह्रीं ऐं वज्रवैरोचनि ह्रीं ह्रीं फट्
स्वाहा दक्षिणकालिका श्यामा कालरात्री सुरेश्वरि एता भेदा विहीनाश्च यथाकामफले
प्रदाः इति श्रीदक्षिणमूर्तिमुनिविरचिते उद्धारकोशे सर्वागमसागरे षट्देवीमंत्रोद्धार ८
कोशभेदसूचको नाम द्वितीयः कल्पः २ ॐ भैरव उवाच अथ देवि प्रवक्ष्यामि देवीनां

मंत्रमुत्तमं शृणुध्वैकाग्रमनसा ब्रवीमि तत्कुतूहलात् दक्षिणामूर्तिना तस्मिं कालेनैवा
सिनेनदा भाषिताषोडशीविद्यानन्तदा हाम्भकोमुनिः तस्मिन्काले मुने तस्याश्च मंत्रनिसे
विते आययुर्मुनयः सर्वे सोत्सुकामंत्रकांक्षिणः लोहितो हालकोशंखमतंगौपुण्डरीकतौ
शाण्डिल्यगालवौ चैवमेते तमाश्रमं ययुः सर्वे मिलित्वा मुनिपुङ्गवैने श्रीदक्षिणामूर्तिमि
दंतमब्रुः परस्परं वैसत्कुलेष्टदेवीमंत्रान्वदघाच्छ भक्ताः नम्रकृः श्रीदक्षिणामूर्तिरुवाच शृ
णुध्वं मुनयः सर्वे वक्ष्याम्यद्य परमुत्तमं चराचरेस्मिञ्जगति देवी त्रिपुरसुंदरी तैव नाटकु।
चिदस्ति देवी सामंत्रशेखरा तस्याश्च वदनांभोजात्समदेव्यः श्रुता मया यद्येष्टफलदा
यिन्यः सर्वरोगभयापहाः अचिरेणैव कालेन फलदास्तत्र भक्तितः ऋषयऊचुः का
देव्यः कानि नामानि कीदृशानि मंत्रनिच प्रसादं कुरु विप्रर्षे चेदस्मासु दयानव मुनिरुवाच
देवीनां परमप्रीत्या मंत्रान्शृणुध्वमेऽप्यतः येन श्रवणमात्रेण हयमेधफलं लभेत् ईश्वरउवा
च मुनीश्वरान्समतं देवो दक्षिणामूर्तिरब्रवीत् सप्तविद्याः पुराप्रोक्ता वज्रयोगिन्यादि देवता तासां
नामानि वक्ष्यामि पर्वतेश्वरनंदिनि दक्षिणामूर्तिनादेवि सप्रकाशिनानितत्वतः श्रीवज्रयोगिनीदे

वीवाराहीमाराधितमया कामेश्वरीतयागौरीश्यामशर्द्धिलेयैवच गुलवागेश्वरीपत्नाः समदेव्याः
ऋतामया दक्षिणामूर्त्तिनातेभ्यः सप्तविद्याः प्रकीर्त्तिताः एतासांबलमाश्रित्यदेवीत्रिपुरसुं
दरी ससर्जेजगद्देतद्युपालितेपिसुरेश्वरि हरेणापितयाविश्वंचराचरसमन्वितं ऋषिभिर्वा
उ॰ कौ॰ च यतस्त्वाव्यामलंतमस्यामुखांभोजाकुलंमया नासांमंत्राणिवक्ष्यामिशृणुध्वंमुनिपुंगवाः
९ अथमंत्रोद्धारः उक्तंचस्वतंत्रे प्रणवंसकलाचैवबीजंहोफलायकौ मध्येपिवज्रयोगिन्यै
स्वाहेतीरस्मुदाहृतं मकाराः ॐह्रींवज्रयोगिन्यैस्वाहा अस्याः मूलमुपादिश्यपयः संग्रामंप्र
१ विशति सनिर्जित्यरिपून्सर्वान्कल्याणीगृहमाविशेत् अस्यामूलहृदयंदेविजपतेहृदि
मानवः द्वादशदिवसांत्तावत्सिद्धिर्भवतिवाञ्छिता अस्यावीजमुपादिश्यध्येकांतेप्रज
पेन्नरः ऋतुस्नातायानारीमैथुनंकुरुतेनरः शुक्रेणसहदेवेशिसमभिरोषधैर्लिखेत् यो
नामध्ये १ कुंकुम २ गोरोचनं ३ अगुरुकर्पूरं ४ विषारिष्टः ५ सिद्धार्थः ६ मालती ७ ९
लिखित्वासमवेद्राजा अस्यायंत्रंसमंत्रकं लिखित्वाधारयेन्मूर्ध्नित्रैलोक्यविजयीभवेत् अ
स्याः संभोगकालेतुमंत्रंजपन्सुरेश्वरि कांतायांमैथुनंकुर्याद्बहुपुत्रयुतोभवेत् अस्याः यंत्रे

स्वमंत्रंचबाहौयोधारयेन्नरः यावज्जन्मभवेत्तस्यतावल्लक्ष्मीर्भविष्यति अस्याः यंत्रंसमंत्रंचबाहौ
योधारयेन्नरः अनुवादेसभायांचगणेवाक्कालिःसहसाभवेत् नस्यात्रिपुरसुंदर्याःमुखांभोजात्मम।
याकृतं फलमेतन्महाश्चर्यकारकंमुनिपुङ्गवाः इतिवज्रयोगिनीमंत्रः अथवाराहीमंत्रोद्धा
रः ॐकंचत्रिपुरानिलके वामनाचैववाङ्लीकंनमोबीजसमन्वितं वाग्भवंमोश्मकंचैवततः
पल्लवमुद्धरेत् भगवतिचवार्तालितलोवाराहिदेवते वाराहमुखिचैवंतुवासनंचमळेतथा त
तःपंकजपयोजैोहरंनीरंमहेश्वरि भगवत्यावाराह्यास्मद्ध्योकत्रिंशाक्षरोमनुः अथवाङ्लीक
बीजोद्धाराणि वाङ्लीकंभवसंज्ञंचहिंगुबीजंमुनीश्वराः ग्लौंबीजोद्धारमेतद्धिवान्यदन्नमाव
देत् इतिमुग्धमालातंत्रोक्तं अथनमोबीजोद्धाराणि स्वतंत्रे नमोबीजंतथाध्यानंमोहनंनिमि
रमेवच लंबीजोद्धारान्येतानिकृत्रिमान्यपराणिच प्रकाशः ऐंग्लौंलंऐंनमोभगवतिवार्तालि
वाराहिदेवतेवाराहिमुखिऐंग्लौंठःठःफट्स्वाहा २६ इतिवाराहीमंत्रः अथशारदामंत्रोद्धारः
ॐकंचशारदापटले तारंमायांचमदनंशारदेहितेयमीश्मकं मंत्रंचषट्शिरोज्ञेयंततःपल्लव
मुद्धरेत् भगवत्यैशारदायैचांतेलज्जाचठद्वयं प्रकाशः ॐह्रींक्लींसौःनमोभगवत्यैशार

हायै ह्रीं स्वाहा अथ कामेश्वरीमंत्रोद्धारः मायां च हरिणाक्षीं च चंद्रः शीतांशुरेव च मदनम्मन्मिथ्यां
नौ ह्रीं संयोज्य स्तनबीजकं मनुः समस्गिरितोल्पेयं ललः पल्लवमुद्धरेत् जंबनाख्यं ततो देवि कामेश्व
रं तथैव च ततो बाणदेवते पिह्यंलेतीरमुद्धरेत् कामेश्वर्या महादेव्या ह्याविशद्वर्णो मनुः चंद्र
३-को- स्य बीजो ह्यो पेंद्रं च अथ चंद्रबीजोद्धाराणि ॐकं च कालीसर्वस्वं चंद्रः शीतांशुरिंदुश्च शर्वरीप।
१ तिरेव च ताराधिपः सुधारश्मिः कृत्रिमाण्यपराणि च अथोर्मिबीजोद्धाराणि अस्मिन्नेव
उर्मिवीचिस्तथा चैवं तरंगाख्यितयंस्मृतं ब्लं बीजोद्धाराण्येतानि कृत्रिमाण्यपराणि च अ
थ स्तनबीजोद्धाराणि ॐ वागमालंकारे स्तनबीजं कुचं चैव वक्षोजो हृत्कुमेव च जं बीजा
न्येवमेतानि कृत्रिमान्यपराणि च प्रकाशः ॐ ह्रीं श्रीं ह्रां ह्रीं ह्रूं जं जंबनाख्ये कामेश्वरि।
बाणदेवते स्वाहा इति भैरवपटलो मंमलं अथ गौरीमंत्रोद्धारः ॐ च त्रिपुराधिरामणो
प्रणवं कमलां चैव मायां वाङ्गीकमेव च शिवबीजं तथा देवि गौरी शर्वस्य हृदयं भगवत्या १०
महागौर्याबालस्तु हादशाक्षरः अथ शिवबीजोद्धारः ॐ च ऊलचूडामणो शिवबीजं
च शंभुश्च शर्वः शंकरमेव च गं बीजानि चचत्वारि कृत्रिमान्यपराणि च प्रकाशः ॐ श्रीं ह्रीं

ग्लौं गं देवि गौरि गीं स्वाहा अथान्नपूर्णामन्त्रोद्धारः ॐ अं च कामीश्वरीतन्त्रे मारं वराधिकम
लामीनकेतनमेव च विश्वं ततो भगवति माहेश्वरि तथा पुनः अन्नपूर्णे ठद्वयं च मनुः विंशा
क्षरः स्मृतः मीनकेतन इति दोषः ॐ च स्वकृतौ त्रिपुरासुंदरीसर्वस्वे ध्यात्वा मायापि पश्चा
च कामं विश्वमुदाहृतं बीजं तत्षट्शिरोन्तेयं विघ्नेन सह भामिनि इत्युद्धारः प्रकाशः ॐ ह्रीं
श्रीं क्लीं नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा इति मूलम् अथ कुलवागीश्वरीमन्त्रोद्धा
रः ॐ अं च समुदायमालातन्त्रे प्रणवं मदनं चैव स्कंदं नारायणप्रिया नटं चैव मिक्काबीजं ततः प
लवमुद्धरेत् ऊषहस्ले ततः पश्चात् कुलवागीश्वरीति च अन्ते च वासनाबीजं पद्मं कात्यायनीर
जे नर्मकीबीजमंभोजं पयपश्चैव सुरेश्वरि कुलवागीश्वरी देव्यास्त्रयविंशाक्षरो मनुः अथै
क्काबीजोद्धारः वामकेश्वरे एक्काबीजं स्फुरा कांता लिप्साबीजं चतुष्टयं ऊं बीजान्येवमेतानि
कृत्रिमाण्यपराणि च अथ नर्मकीबीजोद्धारः किं रहस्ये नर्मकीबीजमप्युग्रं वेष्यापि वा
णकालया प्रणवश्रीपंचबीजानि रंभीबीजस्यानन्तरं अथांबुजांभोजयोरेकामिति न दोषः
प्रकाशः ॐ क्लीं ह्रां श्रीं ह्स्लैं ऊँ ऊषहस्ले कुलवागीश्वरि ठंठः ऊं जं रं श्रीं ठः स्वाहा इति मूलम् ।

एतामयामहेशानि समविद्याप्रकीर्तिताः अद्याहं तव भक्त्या मे हृदि यच्छोचते प्रिये वद मे सत्वरं देवि
न हन्यामि सुविस्तरं श्रीदेव्युवाच पंचानां बालकानां च कीदृग्याले मन्त्रनमाः कृपयापि पुनर्महेश
चितापितप्रकाशिता मन्त्रयुत्तुः ब्रह्मर्षेसर्वसाम्राज्यं तत्त्वं मुद्योत्सकलं भक्तं भवत्वं चक्रमाराणा
मस्माकं वक्तुमर्हसि दक्षिणामूर्तिर्मुनिर्ब्रवीति ईश्वरः पार्वतीं ब्रवीति ईश्वर उवाच शृणु पार्व
ति देवेशि महर्षीणां पुराशिवे दक्षिणामूर्तिनोक्तं यत्तन्नेवक्ष्यामि तत्त्वतः हेरम्बशरजन्मानौ कार्तवी
र्यार्जुनस्तथा हनुमद्भैरवावेते भाषिताः पंचबालकाः उक्तं च भैरवे तंत्रे वामकेश्वरे च हेरम्बशर
जन्मानौ महामृत्युंजयस्तथा कार्तवीर्यार्जुनश्चैव हनुमद्भैरवौ तथा स्वयं मया च तंत्रोक्ता
भाषिता षट्कुमारकाः रुद्रयामले गणेशो वटुकश्चैव स्कंदो मृत्युंजयस्तथा कार्तवी-
र्यार्जुनोप्येवं सुग्रीवो हनुमांस्तथा यामले रुद्रयामलादौ भाषिताः सप्तबालकाः अथादौ गणे
शमंत्रोद्धारः प्रणवं कमलालज्जां कंदर्पं मन्त्रबीजकं शंकरं षट्शिरो हेत्यन्तनः पल्लवमुद्धरेत् ग
णपतये तनः पश्चाद्वरवरदमेव च सर्वजनं ततः पश्चान्मे वशमानय ततिच अंते पिठद्वयं ज्ञेयम
ष्टाविंशाक्षरो मनुः प्रकाशः ॐश्रींह्रींक्लींग्लौंगंगणपतये वरवरद सर्वजनं मे वशमानय स्वा

उ॰ को॰ १२ १२

हा २८ उत्तिमूलम् अथकुमारमंत्रोद्धारः ॐचक्रकुलचूडामणौ प्रणवंक्रुविबीजंच
मंत्रंचहिशिरः स्मृतं मध्येकुमारायनमोह्यंतेनोरमुदाहृतं अथक्रुविबीजोद्धारः ॐ
सिद्धसारस्वते क्रुविबीजंकांतिबीजंशोभापिसुभ्रमातया हांबीजानिचचत्वारिकु
त्रिमान्यपराणिच प्रकाशः ॐहांकुमारायनमः स्वाहा उत्तिमूलं अथकार्त्तिवीर्यार्जु
नमंत्रोद्धारः ॐचोडामरे प्रणवंवायुरुज्यापिवाहकंमन्मथस्तथा शुक्रंबीजंतथाम्र
न्यंकमलाररनांतथा चंद्राडिंभंचकूलेचतुरंगंचसुरेश्वरि मध्येतन्नामविज्ञेयंकार्त्तिवीर्या।
र्जुनायवै अंतेपंचोमनुःप्रोक्तोपकविंशाक्षरःशिवे अथशुक्रबीजोद्धारः ॐचक्रिन्ना।
शिरोमणौ शुक्रबीजंतथाकाव्योभार्गवः कविबीजकं दैत्यमान्योमहेशानिसुरासुरनम
स्कृते श्रौंबीजानितुपंचैवंकुत्रिमान्यपराणिच प्रकाशः ॐब्रौंकुं क्लींब्रौंस्रौंश्रौंक्रौंपं
ह्रांफट्कार्त्तिवीर्यार्जुनायस्वाहा शुक्रबीजोहौब्रौंल्लंच अथहनुमंतमंत्रोद्धारः ॐ
चक्रकुलचूडामणौ प्रणवंमर्धबीजंचविमूर्तिलवनंतरं हनुमतेततःपश्चाद्रामदूतायवै
पुनः लंकाविध्वंसनायेवमंजनीगर्भसंभवः भूतायशाकिनीचैवडाकिनीलवनंतरं वि

ध्वंसनायकिलिह्रौंबुबुकारेणवैपुनः विभीषणायहनुमद्देवायतदनंतरं अहंमायाहरी
णाद्येअंगषट्कंदंतयैवच हृदयपक्षयांतेपिसमष्टाक्षरोत्तरोमनुः प्रकाशः ॐऐंश्रींह्रींहनु
मतेरामदूतायलंकाविध्वंसनायअंजनीगर्भसंभूतायशाकिनीडाकिनीविध्वंसनायकि
उ॰ को॰ लिकिलिबुबुकारेणविभीषणायहनुमद्देवायॐह्रींश्रींह्रैंह्रांफट्स्वाहा इतिमूलं ६०
१२ अथभैरवमंत्रोद्धारः उक्तंरुद्रयामले प्रणवंमन्मथंमध्येबीजसमन्वितं अग्निबीजक
ल्पबीजंश्मशानाग्निबीजसंयुतं मायामध्येपिवटुकंभैरवायायमर्दीनया अंतेभैरवस्यायंम
12 नुरष्टादशाक्षरः इति अथाश्वबीजोद्धारः उक्तंचवामकेश्वरे अश्वबीजंचसीमंतमेवु
मरुद्वलंयवंवीबीजानिचपंचैवमनन्तान्यपराणिच अथाग्निबीजोद्धारः त्रिपुराति
लके अग्निबीजंतथासिंधुःसरस्वान्सागरस्तथा हंबीजानिचचत्वारिकृत्रिमान्यप
राणिच हकारश्चाग्नियोर्भेदेअग्निबीजंरं अग्निबीजंहं अथाग्नियोरंतरादंतरमितिनदो १२
षः अथकल्पबीजोद्धारः उक्तंवागमालंकारे कल्पबीजंचसंवर्तंग्लपंह्लयबीजकं ह्लाम
कंकल्पकंत्वरंतथाकल्पान्तबीजकं अंबीजान्येवमष्टौचकृत्रिमान्यपराणिच अथपानबी

बीजोद्धारः आगमलहर्यां शक्त्रीशालिकायमामाह्लादशुक्कलंनया धीबीजानिरूपचे
वमसत्यान्यपराणिच प्रकाशः ओंक्लींबीं हंधंबींह्रींवटुकभैरवायनमः स्वाहा अथमहाम
त्युंजयस्यमंत्रोद्धारः अंकंचआगमलहर्यां अथेहह्रंसाकिशोभेपिशंकामानस्वाहेपालयद्वै
तयैवच तस्माकलिः त्वंअरहजग्रासोमंत्रोद्धारंदेवमृत्युंजयस्य प्रकाशः ओंजुंसः हंसः
मांपालय २ सोहंसः जुंओं अथमसुग्रीवमंत्रोद्धारः उक्तंचआगमशिरोमणौ तारंमायावाग्भ
वंमन्मथस्वशक्तिमध्येनामसत्यमातथांते कालीपद्मौ कूर्चपद्मौसमस्वापग्नौ नीरमेषसुग्री
वमंत्रः उक्तुद्धारः प्रकाशः ओंह्रींऐंक्लींसौः सुग्रीवदेवायक्लींठः ह्रंठः ह्रींठः स्वाहा इतिम
लम् मयाख्यातः सुदेष्णानिहितेतेवैसमबालकाः रविलोमहर्षिरुवाच श्रुणुध्वमृषयः किंचि
दस्माकमस्तियद्धृदि ब्रवीमिभवतांभीआनाथपिनुमर्हथ इतिश्रीरविलोमहर्षिमुनिविरचि
तेउद्धारकोशसकलागमसागरेसमविद्यासमक्रमारशोकाख्याननामतृतीयः कल्पः ३ मुनय
ऊचुः ब्रह्मर्षेसर्वतत्त्वज्ञशास्त्राम्भोनिधिपारग नवग्रहाणामस्माकंमंत्रंत्वंवक्तुमर्हसि ईश्वरउ
वाच तस्मिन्कालेमहर्षीणांपृष्टंसंधानसूचना नवग्रहाणांमंत्राश्चतान्वदामिसमासतः आदि

त्येंदुजस्य मात्स्यगुर्विंदू परमेश्वरि एतेपंचमहेशानि पंचेशो वामदेवता: भौमार्किराहवश्चैव त्रय
एते मुनीश्वर: देवस्तत्पुरुषरो लोचनत्रयदेवता: केतुस्य परमेशानि भूमिदेवा: प्रकीर्तिता:
एतेनवग्रहा: प्रोक्ता: शंभुनारुद्रयामले अथातोपंचग्रहमंत्रोद्धार: तत्रादौ आदित्यस्य मंत्रोद्धार:
उ·को· ॐकं च विश्वनाथ समारोद्धारे प्रणवं चांबरं लक्ष्मीं मायामबीजं तथैव च बीजं तु धौ शिरोन्तेयतनन:
१२ पल्लवमुद्धरेत् ग्रहाधिराजाय आदित्याय तथैव च अंतेपयस्तु विज्ञेयं मनु: द्वाषष्ट्यक्षर: स्मृ
त: अथांबरबीजोद्धार: अंबरं वस्त्रबीजं च शून्यं शाकिनीति निहुयं हरितं हरिणी बीजं हरितं बीजमे
13 व च ह्रौं बीजानि षड्देवि कृत्रिमान्यपराणि च अंबरबीजो ह्रौं आं ह्रौं: प्रकाशे ॐ ह्रौं: श्रीं श्रीं
ग्रहाधिराजाय आदित्याय स्वाहा अथ बुधस्य मंत्रोद्धार: ॐकं च स्वतंत्रे प्रणवं च तथा स्कंदरस
ताच षडानन: मध्ये विग्रहनाथाय बुधाय एतेच ठद्वयं बुधस्य ग्रहनाथस्य मनुश्चतुर्दशाक्षर:
अथ षडाननबीजोद्धार: ॐकं च कृत्तिका सर्वस्वे षडानन: शरजन्मा स्कंद: कुमारबीजकम्
शांभव: शालिनी बीजं तथा षण्मुखबीजकं ॐ बीजानि च समैवमसन्यान्यपराणि च प्रकाश: १२
ॐ ह्रां क्रों उं ग्रहनाथाय बुधाय स्वाहा अथ शुक्रस्य मंत्रोद्धार: ॐकं च आगमशिरोमणौ प्रणवं

मर्धवीजं च लक्ष्मीवीजसमन्वितम् शिववीजं ततो मध्ये ग्रहेश्वराय चैव ततः शुक्राय ततो भ्रमरी चैव
बालस्त्वनुद्धारः प्रकाशः ॐ ऐं ह्रीं श्रीं ग्रहेश्वराय शुक्राय नमः मूलं अथ बृहस्पतिमन्त्रोद्धारः
ॐकं च त्रिपुरातिलके यत्नं मायाधिसौभाग्यसुरासुरनमस्कृते तरंगवैश्यसंयोज्य चार्ध
क्लीं ह्रीं बीजकं तु ऊर्ध्वं च बहुशिरोमे पंनतः पल्लवमुद्धरेत् ततो गुरुहाधिपतये बृहस्पतये एव
च पुनर्वारिवहश्चैव पद्मलक्ष्मीं तु नीरजे वासनापंकजे चैवमन्ते मालांकवनं शिवे इत्युद्धारः
सौभाग्यमिति दोषः तस्याधिगन्तुमुनयः स्वयं स्पनधीर्भवेत् कुरुविरणोक्त सौभाग्यं देवाश्च वो
रतरे महत् उति लोषः ॐकं च सुन्दरी सर्वस्वे प्रणवं सकलं चैव वदेत् शिरः किरणी तथा ततो
वारिवाह इति दोषः वामकेश्वरे प्रणवं च परां लक्ष्मी धीश्चिर्वैश्य वियोजयेत् चंद्रसमं ततः
पश्चाद्गुरुहाधिपतये तथा ततो बृहस्पतये पितलो जीमूलवीजकं पद्मलक्ष्मी नीरजं च वासना
पंकजं तथा अन्ते नीरं समाख्यातं पंचविंशाक्षरो मन्त्रः प्रकाशः ॐ ह्रीं श्रीं क्लीं ऐं ग्लौं ग्रहाधि
पतये बृहस्पतये वीं ठः श्रीं ठः ऐं ठः स्वाहा अथ चंद्रस्य मन्त्रोद्धारः ॐकं च कालीपटले यत्नं
वहशिरोद्दीच अंगेलीवीजसमन्वितं हरे तम्रार्द्धं संयोज्य शून्यानुस्वारसंयुतं नादबीजं ततो

मध्येचंद्रार्धांतेश्वरीस्मृताः अथनादबीजोद्धारः नादबीजंचनतनंताऽवंतलबीजकं चंबीजा
निचचत्वारिहृत्त्रिमान्यपराणिच प्रकाशः ॐश्रींश्रींह्रींचंचंद्रायनमः इति एतेषेपंचबाणानां
ग्रहाः पंचप्रकीर्तिताः अथत्रिग्रहमंत्रोद्धारः तत्रादौभौममंत्रोद्धारः ॐकंचशारदालीकाये
उ.कौ. नारणीहरिणीवीजंहविर्निशर्वरीपतिः वेधोवीजंततोमध्येग्रहाधिपतयेततः भौमायो
१८ नेपयः प्रोक्तमनुः पंचादशाक्षरः अथवेधोवीजोद्धाराणि वेधोवीजंविधिर्ब्रह्मात्स्वयंभूर्वी
जमेवच कंबीजानिचचत्वारिहृत्त्रिमान्यपराणिच प्रकाशः ॐह्सौः श्रींक्रंकंग्रहाधिपतये
भौमायस्वाहा इति अथशनैश्चरमंत्रोद्धारः ॐकंचश्रागमल्लहर्यो नार्लज्जाश्रियंचैववीजं
तुत्रिशिरस्मृतं ग्रहचक्रवर्तिनेपिशनैश्चरायवैततः मदनंवासनाशक्तिरंतेनीरमुदाहृ
तं शनैश्चरस्यदेवेस्यमनुःविंशाक्षरःस्मृतः प्रकाशः ॐश्रींह्रींग्रहचक्रवर्तिनेशनैश्च
रायक्लींपैसः स्वाहा २० अथराहोर्मंत्रोद्धारः ॐकंच अस्यामेव प्रणवंस्मृतायुग्मंतदयु १८
ग्मंचगर्जितं ततोर्कपाणिवराहवेहव्यवाहनः लज्जालक्ष्मीतथाभीमाद्यंतेचनमुदाहृतं रा
होर्विंशाक्षरोबालोयपंमीष्टफलप्रदः उत्सुद्धारः स्वतंत्रे गर्जितंस्वनवीजंचतत्रानिन्तंस्मितंत

या रं बीजानि चत्वारि कूटत्रिमान्यपराणि च प्रकाशः ॐ क्लीं श्रीं हूं हूं टं टं कधारिणे राहवे रं ह्रीं श्रीं
मैं स्वाहा इति अथ केतोर्मन्त्रोद्धारः उकारं च स्वनं त्रसुकावलो गणवं सकलात्पृथ्वि स्वनोपि कूटत्रयम्पि
णे केतवे पितलः पञ्चाशत्रं रं कापयस्तथा केतोरयं महामन्त्रो दशाक्षरः अथ पृथ्वीनोद्धारः
पृथ्वीजं तकारं केवर्णोपलस्तु वाचिकः क्रं बीजानि चत्वारि कूटत्रिमान्यपराणि च इति मुण्डमाला
तन्त्रे प्रकाशः ॐ ह्रीं क्रं क्रूं ह्रः पृथिव्यै केतवे पैमोः स्वाहा एषां नवग्रहाणां च मनवो भाषिता मया अ
थाहं नवदेवेशि अथाहं नवदेवेशि वर्णानां --- मन्त्र कोशं लोकोपकारार्थं गोप्याद्गोप्यं।
एतन्मन्त्रं येन विज्ञानमात्रेण मान्त्रिकः साधको भवेत् इति श्रीदक्षिणामूर्तिसंहितायां विरचिते
उद्धारकोशे श्रीषागमनसागरे नवग्रहमन्त्रोद्धारकोशाख्याने नाम चतुर्थः कल्पः ४ ऋषय ऊचुः
श्रीसर्वज्ञ ब्रह्मपुत्र सर्वागमार्णवपारग श्रुतोऽसि महाभाग ब्रह्मणः कृपया प्रभो नानागमप्रमा
णेभ्यस्त्वाभिः श्रुतानि तन्मुखोद्गतात् वर्णानां श्रोतुमिच्छामो मन्त्रकोशं निवेदय श्रीदक्षि
णामूर्तिरुवाच शृणुध्वं मुनयः सर्वे मन्त्रोद्धारं यथाविधिः वर्णानां मन्त्रकोशं च कथितं त्रिपु
रामुखात् ईश्वर उवाच शृणु देवि प्रवक्ष्यामि वर्णकोशं सुविस्तरं मुनीनां सूचितं यच्च दक्षिणा

मलिनापुरा उक्तं च त्रिपुरातिलके आं मबीजमकारस्य स्वाम्येव हीनमेव च आनसंतमनोबीजं विमा
महमिति सतन्त्र आ परमनन्तं संज्ञेयम कारस्य सुरेश्वरि अं शून्यं तमम्बरं व्योम चैव सर्वं चेति भाषितं आ
कारस्यानन्तमन्यदुक्तं भैरवतन्त्रके आं इन्दुबीजं तथा जिल्लु महत्वान्महवाहरि: शैवमिकारव
उ.को. र्णास्य कृत्रिममपरं वदेत मया प्रोक्तं महादेवेशि ग्रन्थे भैरवतन्त्रके ईं पुष्टिबीजं तथा मेधा धीबीजं
१५ च गतिस्तथा पैङ्गं तथैव विज्ञेयामीकारस्यान्तपरं मया प्रोक्तं महेशानि त्रिपुरातिलके शिवे
ईं पैङ्गबीजं हीरे ईं उं श्रीबीजं तथा नन्दा वामनं घोनबीजकं सौगम्युकारबीजानि कृत्रिमान्य
15 पराण्यपराणि च मया प्रोक्तानि सर्वस्वेऽक्षु त्रिकायाः सुरेश्वरि ऊं कचबीजं तथा केशमूर्धजं
च शिरोरुहं पैं ऊं वमनन्तमन्यत् ऊकारस्य सुरेश्वरि शिरोमणिं मया प्रोक्तं सुन्दर्याः परमेश्वरि
पापा बीजं तथा पापं किल्बिषं कल्मषं तथा किंकिणी बीजमेवं च मंगलमनन्तं परं ऋकारे
स्यारहस्ये स्मिन्काल्याः प्रोक्तं मया शिवे ॠं कृपा बीजं दयाबीजं करुणा कर्षिकस्तथा ॠ १५
कारस्यानन्तमन्यज्ञापितं विश्वयामले ऌं विश्वबीजं हयन्ते येऌकारं वनमश्नति व्यक्तबी
जं जगद्बीजं गौरीं प्रोक्तं मया शिवे ॡकारस्यानन्तमपरमुक्तं च रुद्रयामले ॡं गंगाबीजं स्व

धुनीचनाकवापीचस्वर्नदी स्रौं क्रमन्यदमन्यंचलक्ष्कारस्यमयास्मृतं ग्रंथेचमहत्कौलेदेविमंत्र
सागरतंत्रके लं पकारश्रीमालकाचलनावीजेनथैवच वलींवीजंचवाराकीवान्यदन्नमा
वदेत् अपरंचमयाख्यातमेकारस्यसुरेश्वरि कुलचूडामणौग्रंथेरचितेमांत्रिकोत्तमैः ऐं वा
ग्भवस्सर्वबीजंचवारणंचाधिकेश्वरः चंडोपिचमेवसनेवासनापितथैवच चार्वंगापिचच
मौणेमातंगोहादशाकामथ पलक्षंख्यातमयादेविपैकारस्यानन्तपरं त्रिपुरासर्वस्वेग्रंथेहत्ति
णाम्र्तिनाकृते ऐं प्रणवंचतथाताराख्यंहंसेनोमापिअंबका ग्रासस्मारवोदेवेशिकेतवंच
मयास्मृतं क्रियाशिरोमणौग्रंथेरचितेपिमयास्वयं ॐ मोक्षवीजंतथामुक्तिर्निर्वाणत्रोन
वीजकं प्रणवंचमयाख्यातंग्रंथेभैरवतंत्रके ॐ ग्रंवीजंहृदबीजंचपादपंचधराहंसम भ
हंहेचमयाख्यातमनन्तमपरंवदेत् सिद्धिसारस्वतेग्रंथेस्वलीलाप्रकाशिते श्रं नागबीजमपरंच
भाग्यबीजंचभानवं श्रौंवंख्यातंमयादेवि श्रः महत्स्यानन्तपरं ग्रंथेत्रिपुरसुंदर्याः सर्वस्वेविश्वडे
लेभे श्रः ककारंवशिरोवीजंमस्र्धवीजंचवारुणं वेधावीजंविधिर्ब्रह्मास्वयंभूबीजमेवच
ककारस्यमयाख्यातमनन्तमपरंवदेत् ग्रंथेक्रियारहस्येअस्मिन्सर्वलेस्वरतेदिनि कं नभोवी

जंपुष्करंचग्लौंबीजंचक्रवालकं वैष्णवबीजंचप्रोक्तंचत्रिपुराख्यं आगमाम्नलमंजर्या
दुर्लभायांमयापिच एं शिवबीजंचशंभुस्सर्वःशंकरस्तथाच गकारस्याननमन्यज्ञाषिते।
वमयाप्रिये कुलचूडामणौग्रंथेदुर्लभेत्रिदिवेपिच गं जिनबीजंषष्ठभित्तंमारजिद्बीजमेव
उ.को. च मायात्मजोऽर्कबंधुश्चगौतमसमन्वितंपरं चकारस्यमयाख्यातंग्रंथेवैरुद्रयामले घं षडाननः
१६ शरजन्मास्कंदःकुमारबीजकं षण्मुखःशालिनीबीजमनन्तमपरंस्मृतं ऊर्ध्विकासर्वस्वेख्या
तंमयात्रैलोक्यस्वजिते ङं नादबीजंचनर्तनंनादेवेन्द्रबीजकं चकारस्यमयाख्यातंग्रंथे
भैरवतंत्रके चं शानिबीजमर्कबीजंपंगुबीजंनवैवच कालंचसौरबीजंचसप्तितुंबुरबीजकं
छंबीजंचमयाप्रोक्तंग्रंथेकामेश्वरेशिवे छं शानिबीजौहौक्षं पलनबीजंचचैवभुरोजोह्रज
मेवच जकारस्यमयाख्यातमनन्तदर्शनमावहेत् आगमालंकारेणापिग्रंथेभैरवनिर्मिते जं ३।
झंबीजंस्फुरत्ज्वालाबालिकाबीजंचतुष्टयं झकारस्यमयाख्यातममन्यमपरंस्मृतं त्रैलोक्यमयने
ग्रंथेदेविविवेवामकेश्वरे झं यमबीजंकालबीजंकृतांतंसमवर्तिनं कीनाशंमृत्युबीजंचझकार। १६
स्यमयास्मृतं त्रिपुरासर्वस्वेग्रंथेत्रिजगद्दुर्लभेप्रिये झं कालबीजंद्वौनेक्षंच मर्जितेस्वनबीजे

वल्लनितेरस्वनेनया हकारस्यमयाख्यातंस्वतंत्रेदेववंदिते ढ पद्मंपंकजमप्योनीनीरज
मंबुजंतया ठ पंचठकारबीजानिकृत्रिमान्यपराणिच मयाख्यातानिदेवेशितंत्रेवैवामके
श्वरे ठं सिंरिकामस्रसीवीजंरेणुकावीजमेवच अंजनीवीजकंख्यातमनन्तमपरंस्मृतं ड
कारस्यमयादेविग्रंथेवैरुद्रयामले ड वायुबीजमनिलंचसमीरणंमरुत्तया समीरंचाशु
गंत्वेपवानंश्वसनबीजकं हकारस्यमयाख्यातमन्यदन्तमावदेत् ढ वायुबीजोहोदंपभैर
वतंत्रेच आशुगबीजोह्योलंहं वाणवीजंमार्गणंचपत्रिणमाशुगंतया णकारस्यानन्तम।
न्यद्रुधेभैरवतंत्रके ण रात्रिबीजंतमीबीजंतामसीबीजमेवच दपाचक्षणदाबीजमन्यद
न्तमावदेत् कुब्जिकासर्वस्वग्रंथेतद्बीजंचमयास्मृतं ते विलबीजंचविवरंसुषिरंनागलो।
कंकं थकारस्यमयाख्यातंग्रंथेवैकुलिकार्णवे थं चक्रबीजंव्यालबीजंसर्पकाकोदरोरगो।
भोगिवीजंभुजंगंचभुजंगममितिस्मृतं दकारस्यमयाख्यातमनन्तमपरंस्मृतं स्वतंत्रेदेवदेवे
शार्द्विताणम्भस्मिनाकृते दं पृथ्वीबीजंप्रसन्नंचप्रसन्नमिमप्रमानया धकारस्यानन्तमन्यत्त्रिपुराति
लकेस्मृतं धं सारवीजंचलबणोसैंधवंरुकरंस्मृतं वराहमनन्तमन्यन्मयाख्यातंसुरेश्वरि

त्रैलोक्यप्रथिते ग्रंथे त्रिपुरायाः शिरोमणौ नं मत्स्यं च मीनबीजं च शफरीबीजमेव च मत्स्य
बीजं मया ख्यातं ग्रंथे द्विशशिरोमणौ पं कूर्मबीजं च कमठं कर्कटोपि जलीरकं कच्छप
मन्त्रमन्यन्मया ख्यातं च भामिनि शारदातिलके ग्रंथे त्रैलोक्यप्रथिते शिवे फं दुर्मिवीचिल
उ॰ को॰ १८ याचैवं तरंगाखितपंस्तृते प्रसन्नमपरं तेयं मया ख्यातं सुरेश्वरि कालिकासर्वस्वग्रंथे ब्रह्म
णैव प्रकाशिते बं भद्रिकाभास्वतीभीमा भकारस्यान्ततं परं तंत्रे वै मुण्डमालायां मया ख्यातं
सुरेश्वरि भं उलिबीजं शालिबीजं मंडूकं दर्दुरं तथा भेकीबीजं मया ख्यातं मसत्यमपरं स्मृ
17 तं आगमाम्नतमंजयापर्वतेश्वरनंदिनि मं वायुबीजं तथा वाग्मिवाचालं वैश्यबीजकम
वीरबीजं तथा वापी मया ख्यातं स्वतंत्रके यं अग्नीरेफश्च वह्निश्च हुतभुग्हव्यवाहनः रकार
स्य मया ख्यातं श्यामातंत्रे सुरेश्वरि रं तमोबीजं तथा ध्वांतं मोहं तिमिरमेव च लकारस्य म
या ख्यातं स्वतंत्रे मुनिनिर्मिते लं अश्वबीजं च जीमूतमंबुभृद — लेखने भूबीजं धरणीबी १८
जं वकारं भाषितं मया वकारस्य मया ख्यातं तंत्रे वै वामकेश्वरे वं कल्याणं चैव शर्मापि शंशुभे
चचतुरपं शकारस्य मया ख्यातं ग्रंथे भैरवतंत्रके शं शंपाबीजं तडिद्बीजं विद्युच्चंचलाततः श्रा

दिनीवीजकं चैव मसन्यमपरं स्मृतं मयाख्यातं तु रेशानि ग्रंथे वै रुद्रयामले ॥ षं शाकिः शार्को।
पिविन्नेयोसारकं केन चैव च मकारस्य मयाख्यातं ग्रंथे कि आ ...रोमलो मं कं विवीजं कोनि
वीजं शोभापि सुषमा तथा आकाशं च हकारस्यानन्तं मया स्मृतं सिद्धिसारस्वते ग्रंथे निल्यमा
नकरु जिते हं देवीवीजं निर्जरं च त्रिदिवं त्रिदिवेशकं स्वरबीजं च गीर्वाणे लेखमरं बीजकं
त्वकारस्य मयाप्रोक्तं कुलच्चडामणौ प्रिये ॥ रं वर्णानां देवदेवेशि कोशं प्रोक्तं मया शिवे नाना
मंत्रयुतं देवि सर्वागमविनिश्चितं इति श्रीदक्षिणामूर्त्तिविरचिते उद्धारकोशे सर्वागममंत्रसा
गरे सर्ववर्णकोशाख्यानं नाम पंचमः कल्पः ५ अथ देवतानां एयद्धाम क्रीं श्रीं श्रीं ह्रीं ह्लौः न
याश्चयद्धा महरेशानि सकलागमनिश्चितं अथ वक्ष्यामि ते देवि निर्तिसौभुवनदेवताः दक्षि
णामूर्त्तिना पूर्वमृषीणां भाषिताः स्वयं भवानीदेवि देवेशि द्वितीया च मंगलामुखी उग्रा
दीचतन्तीया च तिसौभुवनदेवताः आसामहं तेमंत्राणि वक्ष्यामि शृणु पार्वति यस्य कस्य
नवक्तव्यं नवक्तव्यं वरानने अथ भवानीमंत्रोद्धारः मुण्डमालातंत्रे प्रणवं चैव देवेशि यद्व
युग्मपरायुतः हरिणाक्षी दयं कूर्चं हरं ठद्वयसंयुतं प्रकाशं ओं श्रीं श्रीं ओं ओं ह्रीं श्रीं।

श्रीं ह्लीं फट् स्वाहा मूलं अथ बगलामुखीमंत्रोद्धारः आगमकल्पहर्यां तारं चैव महीबीजं स्व
राणं सद्वादृतं मंत्रं च हि शिरोन्तेयन्ततः पल्लवं सुहरेत् भगवति बगलामुखि देवि ततः
पुनः तथापि सर्वदुष्टानां वाचं मुखं पदं तथा स्तंभय हि ततो जिह्वां कीलय हि बुद्धिं त
उ॰ को॰ था विनाशय हि वारं च मलिकाबीजकं तथा अन्त मंत्रे प्रयोज्यं हि पंचाशद्वर्णो मनुः
१८ ततो मलिकाबीजोद्धारः उक्तं च भैरवतंत्रे महीबीजं मलिकाबीजं मन्त्राबीजं प्रभास्तिका म
न्मान्तं तेपरं ज्ञेयं पर्वतेस्वरनंदिनि प्रकाशः ॐ ह्लीं भगवति बगलामुखि देवि सर्वदुष्टानां
18 वाचं मुखं स्तंभय २ जिह्वां कीलय २ बुद्धिं विनाशय २ ह्लीं ॐ स्वाहा मूलं अथेंद्रा
क्षीमंत्रोद्धारः उक्तं च रुद्रयामले अत्तं कुंजीदयं देवि कूर्चयुग्मं ततश्च प्रस्यबीजं प
रोपश्चात् चर्माणं च ततोभिधे इंद्राक्षी वज्रहस्ते ते लक्ष्मीलज्जा च पुष्करं नीरयुग्मे रसने हेत्रास
चेन्द्रो हरं च ने इंद्राक्ष्यादेवदेव्याश्चत्रयोविद्यात्वरेभ्मनुः अथ प्रस्यबीजोद्धारः उक्तं शारदा १८
पटले प्रस्यबीजं भानुबीजं शिवं वेपुष्करं तथा म्लौं बीजोद्धारमेतद्धि चान्यत्तत्तमावदे
त् प्रकाशः ॐ क्षीं क्षीं हूं हूं म्लौं ह्रीं श्री पैं इंद्राक्षि वज्रहस्ते क्षीं ह्रीं म्लौं हूं हूं क्षीं क्षीं ॐ पें फट् स्वा

ह्रा मूलं नित्यपूजामयाख्यानादि त्रिभुवनदेवता दक्षिणामूर्तिनाम मया संसारेस्मिन्प्रकाशिताः
अथाहं देवदेवेशि खेचर्या वच्मि वै मनुम् यामाश्रित्य लभे योगी खेचरीसिद्धिकं कलौ उक्तं वि
श्वयामले गीर्वाणाकृष्टमंत्रं तं चोद्धरेत्प्रतिलोमतः नमो बीजेन तनोदद्यान्मायाबीजेन तनः परं
मनोदद्यात्क्रूरहीनं कूटायं परिकीर्तितः मंत्रान्तर्य शिरोज्ञेयं योगी दद्यान्मनोमिदं खेचर्यै च
तनोदद्यादंते ह्येवमेकमेव च प्रकाशः ह्रीं खेचर्यै नमः मूलं अथ वक्ष्यामि देवेशि ध्याना
गमनिश्चितं च यतोसौ देवतानां च ब्रह्माणां देववंदिते तथा सनकुमाराणां ध्यानेनत्रवि
निश्चितं यथा भेदविहीनानां स्मरणं पार्वतितत्वतः इति श्रीदक्षिणामूर्तिमुनिविरचिते उद्धारको
शेतिसदेवी खेचरीणां कोशाख्यानं नाम षष्ठः कल्पः ६ अथातो दशविद्यानां ध्यानं वक्ष्यामि
तत्स्मृणु वामेश्वरतंत्रोक्तं त्रिपुरायाः सुरेश्वरि दिव्याम्बरांकिततनुं मिहिराग्निचंद्रनेत्रां सुधांशुमु
मुकुटां हिमसन्निभां सिंहासनोपरिसुखेन्द्रधरां भुजाभ्यां ब्रह्मेशविष्णुनमितां त्रिपुरां भजेहं अ
थवश्यास्त्रियो ध्याने भाषितं रुद्रयामले मुनिसाधकगीर्वाणविप्रवर्गैः समर्चिते लक्ष्मीप
द्मासनगतां कदंबसर्वेषणीतां सुनेत्रां मुग्धाप्रसन्नकरयं यरुचिं पद्मांशवाजन्यपाणीनाना मुक्तामणि

सप्तकल्पान्तर्षिनां गीर्हि वाङ्‌ नित्यं लोकत्रिनयफलदां तौम्यहं भक्तिपूर्वं अथ वक्ष्यामि वाग्देव्या ।
ध्यानं विद्याप्रदं शिवे नेत्रप्रभावलोक्यं येतु स्मे त्रिदिवेपि च वाणीं हन्ति निशाकरोज्वलमुखीं क
र्पूरकुंदप्रभां चंद्रार्धांकितमस्तकां निजकरैः संबिभ्रतीमादरात् वीणामक्षगुणं सुधाढ्यकलशं वि
उ.को. द्यां च तुंगस्तनीं दिव्यैराभरणैर्विभूषिततनुं हंसाधिरूढां भजे अथ वक्ष्यामि तारायाध्यानं भैरवतंत्र ।
१९ के देव्याभेदविहीनाया मुनिसाधकपूजिते देवीप्रत्यग्रहषिनां हिमरुचिं प्रीनांशुशंखप्रभां मु
क्ताहारपरीतकंठवलयां रत्नांबरां बिभ्रतीं मल्लाक्षानिगदाधरां स्वरगणैर्वैकुंठवक्त्रोल्लसत्तानि
19 त्यं लोकत्रयैककारणपरां तारां त्रिनेत्रां भजे अथाहं भुवनेश्वर्या ध्यानं वक्ष्यामि तत्त्वतः साध
कोद्दिष्टदेवेश्येनिःसृतं रुद्रयामले उद्यद्भानुसहस्रसन्निभमुखीं पीनस्तनीं पद्मगां दोर्भिः रक्तश
पाशांकुशकंजपाशं बिभ्रतीमादरात् ब्रह्माविष्णुमहेश्वरेंद्रमुनिभिः नित्यं स्तुतां वंदनैः लो ।
काद्ये भुवनेश्वरीं त्रिनयनां रक्तांबुजे हं भजे अथ वक्ष्यामि मातंग्याः ध्यानं पार्वति नंदिनि कुंडि १९
कासर्वसंघेश्वेयमपापल्यन्तदुर्लभं चंद्रार्धांकितशेखरां त्रिनयनां कोटींदुसूर्यप्रभां नानारत्नमह
त्त्वबद्धरशनां प्रेतासने संस्थितां शंखं तोमरपाशहस्तां बुजयुगलां दोर्भिर्वहंतीं मुदा ध्यायेहं हृदये

सदाभगवतीं मातंगिनीं हारिणीं ॥ अथवक्ष्ये महेश्यानिशानिशाचरिकाध्यानमुत्तमम् ॥ आगमामृतमं
नर्यानिःसृतं दुर्लभं जनैः ॥ श्रीशंखचक्रमुसलीं भुजयुग्महस्तां नागेंद्रहारवलयांकितकंठमालां ॥ सिं
हारूढमसहस्रमरीचिदीप्तिं श्रीयामिनीं त्रिनयनां हृदये स्मरामि ॥ अथवक्ष्यामि देवेशि राज्ञीध्यानमुत्
तमं ॥ वामकेश्वरतंत्रोक्तं पार्वतीश्वरनिर्मितं ॥ श्रीनामुबालार्ककृशानुनेत्रां चतुर्भुजां मेणत्वगासन।
स्थां ॥ रोचनाब्जमूलासिधरां महेशीं राज्ञीं भजेहं तुहिनाद्रिरूपां ॥ अथवक्ष्यामि भीडायाध्यानमिष्टा
ग्रदं फलं सुरैः निःसृतमागमाद्यानेमयाररचितं स्तवं ॥ उद्यद्दिनांशुरश्मिफणिचयसदृशीं फुल्लप
द्मोपविष्टां वीणानागेंद्रशालापुथपरसुधरां दोर्भिराद्यैश्चतुर्भिः ॥ मुक्ताहारांशुनानामणिपुनरद
यां श्रीपुराचं वहंतीं वंदे भीडां भवानीं प्रहसितवदनां साधकेष्टप्रदात्रीं ॥ अथवक्ष्यामि देवेशि ज्वाला
मुख्याश्च उत्तमम् ॥ ध्यानं मया विरचितं ग्रंथे ज्वालाशिरोमणौ ॥ ज्वालापरीतास्मतोहहं तां सरोजश
लासिगदाधनूंषि च ॥ सिंहासनेस्थापितपादयुग्मां ज्वालामुखीं सहृदये स्मरामि ॥ अथाहं भद्रकाल्या
श्चध्यानं वक्ष्यामि निःसृतं ॥ स्वयामयाविरचितं नेत्रैर्वामकेश्वरे ॥ मुण्डं विश्वस्य कर्तुः करकमल
तले धारयंतीं हसंतीं नाहं नमावदंतीं सकलजनवशं भद्ररत्नां प्रसदेव स्वामीं विरुगिरीशमरिञ्जु

उ.को.
२०

त्रमयनं दोर्भिरीड्यैर्धृतासिं ध्यायेऽहं भद्रकालीं नवजलदनिभां प्रेतमध्यासनस्थां ॥ तुरीध्यानमहं
वक्ष्ये निःसृतमागमागमते ॥ अस्मिन्नुराचरे ध्याने ब्रह्मलोकप्रकाशिते ॥ नानारत्ननिबद्धचंद्रसकलां
मौलौ जटाभिर्वृते पाशांभोजधरां हि मांसधवलां दोर्भ्यां हि बाहुं शिवां सूर्येंदुग्निविलोचनां स्मि
तमुखीं प्रेतासने संस्थितां ब्रह्माविष्णुमहेश्वरैश्च नमितां देवीं भजेऽहं तुरीं ॥ अथाहं छिन्नमस्ता
याध्यानं वक्ष्यामि निःसृतं ॥ सद्यःकृत्ते त्रिपुरायाश्च ग्रंथे देवि शिरो मया ॥ पत्रांकांसुपरीतभालफ
लकां बालार्ककोटिप्रभां ज्वालाबद्धमहार्हरत्ननिचयां कंदर्पदर्पोज्ज्वलां शूलासंकुशपाशवेणुमुश
लांभोजाभयं बिभ्रतीं भक्ते वांछितछिन्नमस्तकां भगवतीं ध्यायेऽहं हृदब्जे सदा ॥ दक्षिणाकालिकायाश्च ध्यानं
वक्ष्यामि निःसृतं ॥ ग्रंथे कालीरहस्ये स्मिन्पार्वतीश्वरनंदिनि ॥ ब्रह्माविष्णुशिवास्थिमुंडरशनां तां वृ
बूलरक्ताधरां वर्षामेघनिभां त्रिशूलमुशलं पद्मासिपाशांकुशान् धत्ते सा हि युगं धृतां दशभु २०
जां प्रेतासने संस्थितां देवीं दक्षिणकालिकां भगवतीं रक्तांबरां तां स्मरे ॥ अथ वक्ष्यामि श्यामायाध्या
नं पार्वतिनंदिनि ॥ श्यामां तं त्रेमयाध्यानं सकलागमसागरे ॥ त्रैलोक्याक्षजितपरांबुरुहहृदयीं तां
कालांबुभस्महस्ताहृदधरां त्रिनेत्रां स्थूलासिपाशांलमहतीं सभुजैर्वहंतीं श्यामां स्मरे भवशरीरकृतां

सनस्थां अथाहं कालरात्र्यास्तेध्यानं वक्ष्यामि निःस्तले मयाविरचितेदेवि तंत्रे वै वामकेश्व
रे मुण्डाब्जपाशांकुशमभयदवरहस्तां चतुर्भुजां धूम्रनिभां त्रिनेत्रां सिंहासनस्थां धृतपीतवस्त्रां ध्या
येमहेशीं हृदि कालरात्रीं नानाभरणसंयुक्तां देवि वक्ष्यामि तेम्बुरे श्रीवज्रयोगिनीध्यानम् ।
निःसतंत्रकलिकार्णवे रंहस्त्रिसूर्यनयनां पाशांकुशधरां शिवां द्विभुजां सिंहमध्यस्थां भजेहं
वज्रयोगिनीं अथवक्ष्यामि वाराह्याध्यानं तंत्रविनिश्चितं यथाभीष्टफलं देवि कुलचूडामणौ
प्रिये चंद्रार्धचूडां द्विभुजां भुजाभ्यामलोककशोभयामनुर्वीं वहंतीं सूर्याग्निचण्डीकुलहृष्टपानां
ध्यायेत्सदा वै विमलां वराहीं अथवक्ष्यामि देवेशि शारदाध्यानमुत्तमम् शारदापटले ग्रंथे रचिते
विमयास्वयम् षड्भुजां त्रिनयनां स्मिताननां मण्डित्यर्षिस्तुतपादपंकजां पर्वतस्थितवतीं प
तम्बुलां शारदां भगवतीं हृदि ध्याये अथवक्ष्यामि देवि त्वम्बुरे ध्यानमनुत्तमम् कामेश्वर्या हि सु
व्रताः सर्वस्वे तंत्रकोत्तमे त्रिलोचनां सूर्यसहस्रशोभां सिंहासनस्थां द्विभुजां धृतासिं पीतांबरां
विलसन्महेशसेव्यां कामेश्वरीं तां हृदये स्मरामि अथवक्ष्यामि गौर्यास्ते ध्यानं भैरवतंत्रके ग्रंथे मया
विरचिते पर्वतेश्वरनंदिनि गौरांगीं धृतपंकजां त्रिनयनां श्वेतांबरां सिंहगां चंद्रोद्भासितशेखरां स्मि

नमुखीं दोर्भ्यां वहंतीं गदां विभ्रेंशावुग्रयोनिः शंभुत्रिदशैः संपूजितांत्रिहृद्यां मौरीं मानसपं
कजे भगवतीं महादेव्याख्यां भजे अथाहं मंत्रपूर्णाया ध्यानं वक्ष्यामि तच्छृणु निःसृतं भैरवी
तंत्रे मया देवि प्रकाशिते चंद्रार्धमौलिं द्विभुजां त्रिनेत्रां शूलाक्षमालाढ्य भुजे वहंतीं मणिसन
उ॰ को॰ स्यां भुजंगोपवीतां तां मंत्रपूर्णां हृदये स्मरामि कुलवागीश्वरी ध्यानं वक्ष्यामि तच्छृणु प्रिये आ
२२ गमामृतमंजर्यां दुर्लभायां मया वच त्रिशूलासिगदाधरां दोर्भ्यां शक्रास्यां वह्निसन्निभाक्षीं।
सिंहासनगतां कुलवागीश्वरीं भजे अथ वटुकगणेशस्य ध्यानं गीर्वाणपूजिते आगमार्णवपीठ
21 वेदुर्लभे भुवनेंविके हि चतुर्दशवर्णाभूषितांगं कुशलं भोधरमह्युपवीतं हिमगाधिपगामिनं त्रि
नेत्रं शिवपुत्रं हि रत्नाननं भजेहं अथ ध्यानं कुमारस्य वक्ष्यामि शृणु पार्वति निःसृतं मागमो
द्योते मया विरचिते शिवे हिमाद्रिस्वेतं द्विभुजं भुजंगपरीतगात्रं द्विशिखिविशिष्टिरस्थनगेंद्रक
न्याप्रियपुत्रमाद्यं हृदि स्मरे भीष्टप्रदं कुमारं अथ वीरमहेशस्य ध्यानं तव कुतूहलात् य
याभीष्टप्रदं रत्नमुकुटामरविनिर्मितं महसभुजमंडलीजितनमीचरीशाधिपं हिमांशु
सहस्राननं ध्वजसहस्रनलीरकं सितांबरधरं सहानुगगराजमध्यस्थितं स्मरामि भुवनाधिपं। २१

हरिलकार्तवीर्यार्जुनं अथवक्ष्यामिदेवेशिध्यानंतस्यविनिश्चितं मन्त्रंजपस्यदेवस्यग्रंथेकु।
ल्लाशिरोमणौ चंद्रोद्भासितमूर्धजंसुरपतिंपीयूषपात्रंवहन्हस्ताब्जेनसुधांबुकोटिविमलेहा।
स्यास्यपंकेरुहं सूर्याग्नींदुविलोचनंकरतलैःपाशाक्षसूत्रांकुशाभोजान्बिभ्रतमक्षयंपशुप
तिंमृत्युंजयंतंस्मरे सुग्रीवस्याथवक्ष्येध्यानंपर्वतिनंदिनि कुलचूडामणौग्रंथेनिर्मितंमंत्रसा
गरे बालंषोडशहायिनंकपिपतिंवह्निप्रभाभास्वरंदोर्भिर्द्वेहगदाधनुःशरचयान्संबिभ्रतमादरा
त् वंदेदेवस्वरूपिणंरघुपतिंवाराधिपंतंसुदाध्यायेहंभगवंतमर्कतनयंसुग्रीवदेवंहृदि अथा
हंतेहनुमतोध्यानंवक्ष्यामिनिःसृतं कुलचूडामणौग्रंथेपर्वतेश्वरनंदिनि रामेष्टमित्रंजग
देकवीरंप्लवंगराजेंद्रकृतप्रणामं सुमेरुशृंगाग्रमचिंत्यमाद्यंहृदिस्मरेहंहनुमंतमीड्यं अथा
तेभैरवस्याहंध्यानंवक्ष्यामिपार्वति निःसृतंभैरवीतंत्रेयथाभीष्टफलप्रदं कपालहस्तंभुजगो
पवेष्टितंकृष्णकुविरूपधरंत्रिनेत्रं अचिंत्यमाद्यंमधुपानसक्तंहृदिस्मरेभैरवमिष्टदंनृणाम् अ
थवक्ष्यामिसूर्यस्यध्यानंतत्रविनिश्चितं त्रिपुरासर्वस्वग्रंथेदक्षिणामूर्तिनाकृते प्रत्यक्षदेवंविशदं
सहस्रमरीचिभिःशोभितभूमिदेशंसमाश्व सद्धजहलमाद्यंदेवंभजेहंमिहिरंहृदब्जे अथवक्ष्यामि

सोमस्यध्यानंभैरवतंत्रके यथाभीष्टप्रदंसत्यंसुरासुरनमस्कृते सोमात्मजंहंसगतंद्विबाहुंशं
खेंदुरूपमसिपाशहस्तंदयानिधिंभूषणभूषितांगंबुधंस्मरेमानसपंकजेहं बु अथवक्ष्या।
मिगुरोःस्यध्यानंतंत्रविनिश्चितं कुब्जिकामर्वतंत्रेग्रंथेब्रह्मणैवप्रकाशिते संतप्तकांचननि
३·को· भंद्विभुजंदयालुंपीतांबरंधृतसरोरुहद्वंद्वमालं वीरासनंमत्सुरसेवितपादपद्मंगुरुंस्मरेत्त्रि
२२ नयनेष्टरूपंवाबुजेहं गु· अथवक्ष्यामिजीवस्यस्मरणंपार्वतिनित्यनः ध्यानंभैरवतंत्रोक्तंसकलार्थ
प्रदंरणे तेजोमयंशक्तित्रिशूलहस्तंसुरेन्द्रज्येष्ठैःस्तुतपादपद्मं मेधानिधिंमत्स्यगतंद्विबाहुंगुरुंस्म
रेमानसपंकजेहं गी· अथवक्ष्यामिशुक्रस्यध्यानंवांछितसूचकंप्रिये निःस्तनमागमोद्यानेनाना
ध्यानसविन्यतो शंखप्रभमेणप्रियंशशांकमीशानमौलिस्थितमीड्यरूपं तमीपतिंमेवु
जयुग्महस्तंध्यायेहृदब्जेशशिनंग्रहेशं चं· अथवक्ष्यामिभौमस्यध्यानंतंत्रविनिश्चितं आ
गमामृतमंजर्यांस्मरणंच्वैकमनाप्रिये प्रतप्तगांगेयनिभंग्रहेशंसिंहासनस्थंकमलासिह २२
लेस्तुरासुरैःपूजितपादपद्मंभौमंदयालुंहृदयेस्मरामि भौ· वक्ष्याम्यहंशनेर्ध्यानंयथा
भीष्टफलप्रदम् निःस्तनेयमहत्यानिस्तुभदमागमामृते नीलांजनाभंमिहिरेष्टपुत्रंग्र

22

हेमप्रभं पाशभुजंगपाणिं सुरासुराणां भयदं हि बाहुं स्मरेऽन्वहं मानसपंकजेऽहं ॥ ५ ॥ अथाहं हैहि-
केयस्य ध्यानं वक्ष्यामि त्वं शृणु । निःस्तने फलदं नॄणां तंत्रे वै वामकेश्वरे ॥ शीतांशुमित्रोनकमीड्य-
स्पंद्योरं चवेड्रूपनिभं हि बाहुं त्रैलोक्यरक्षापरमिष्टदं च बाहुं त्रिनेत्रं हृदये भजेऽहं ॥ ६ ॥ अथ वक्ष्यामि
केतस्य ध्यानमागमनिश्चितं । निःस्तने मागमाद्याने ग्रंथे वै मंत्रसागरे ॥ नीलोत्पलपुंजं भयदं जना-
नां कृतांतवत्संत्रिभमेकवारं कृत्वा वरं शक्तिधरं त्रिशूलहस्तं केतुं भजे मानसपंकजेऽहं ॥ ७ ॥ अथ
वक्ष्यामि देवेशि भवानीध्यानमुत्तमम् । ज्वलद्दाममलो ग्रंथे निःस्तने भुवनेश्वरि ॥ अरिशं-
खकृपाणखेटबाणान्सधनुः शूलकतर्जनीर्दधानां भयहामहिषोन्नमांगसंस्थां नवदूर्वासह-
शीं भजे भवानीं ॥ अथाहं बगलामुख्या ध्यानं वक्ष्यामि निश्चितं । आगमामलमंत्रे या सुरासुरनम-
स्कृते ॥ नानारत्नविबद्धरत्नमयशरत्नपीतांबराभरणहोमाश्रिमिशशांककरस्मिनयनां सिंहासन-
स्थां शिवां सुहांगेपनिभां महार्घमणिभिः कृञ्जासितांगीं शिवां देवीं श्रीबगलामुखीं हृदि भजेऽम-
के ९ रक्षां भक्तिदां ॥ अथ वक्ष्ये शृणोद्भिन्नमिंद्राक्षीध्यानमुत्तमं । निःस्तने जगदीशानि ग्रंथे वै रुद्रया-
मले ॥ मालासंज्ञशस्पयुग्मकधरां साहसहने त्रोशिवां मनेरावण ९ ९ गां शशिमुखीं त्रैलोक्यरक्षा

परं सोऽसि गगनवर्त्तनां फुल्लाम्बुजनिभां ब्रह्मादिदेवैः स्तुतामिन्दुशाली मनमानरं हृदि भजे कात्यायनीरूपां
परं श्रूयतस्ते महादेवि खेचरीध्यानमुत्तमम् यं ध्यात्वा खेचरीयोगी जीवन्मुक्तो भवेत्कलौ शे
षे भैरवतंत्राख्यानिःसृतं त्रिदशार्चिते विनिद्रकमलोज्वले मुनिभिरर्चितांघ्रिद्वयी सितासित
३·को· वदनत्रां सितकरोज्वलकेवरां श्रीन्दुशिरविलोचनामभयपुस्तकान्वितां स्मरामि हृदि।
२२ खेचरीं भुवनमातरं सिद्धिदां एतां सां देवदेवेशि मंत्रं ध्यानं च यस्मृते यस्यकस्य न दातव्यं ग्रंथ
मुत्तरकोशाक अयपञ्चुः एताः सप्तसप्तुत्तल्पसकलागमपारगाः जयत्वं स्वर्गहेतोर्नुमा
शापयितुमर्हसि दक्षिणामूर्त्तिरुवाच गच्छध्वं ऋषयः सर्वे तमध्वेकपयामम उक्तुमकामु
नयो जग्मुः स्वर्गहेमंत्रलालसाः ईश्वरउवाच दक्षिणामूर्त्तिनानेन रक्षाले यान्मनोरमान्
४ देव्युवाच कृतमुत्तरकोशाख्यं ग्रंथं गोप्यतमं ज्ञेहि श्रीनासि भवतानेन ग्रंथेनाहं सुरेश्वर उक्तुकासहे
साऽंजे कैलासाद्रिसुजग्मतुः तावुभावंबिकादेवी देवश्च वृषशेखरः इतिश्रीउङ्कारकोशे स २२
कलागमसागरे ध्यानकोशाख्याने नाम सप्तमःकल्पः ७ शुभमस्तु सर्वजगताम् कृष्ण
गोविंद दामोदर ॥ राम· कृष्ण राम शिव गोविंद राम· शिव नारायण शुभमस्तु